# Renuka Kavacham 1 from bhairavarudrayAmAlatantra

# રેણુકાકવચં ભૈરવરુદ્રયામાલે

## Document Information

Text title : reNukAkavacham 1 bhairavarudrayAmAle

File name : reNukAkavacham1.itx

Category : kavacha, devii, reNukA, devI

Location : doc_devii

Transliterated by : Kaushal S. Kaloo kaushalskaloo at gmail.com

Proofread by : Kaushal S. Kaloo kaushalskaloo at gmail.com

Description-comments : bhairavarudrayAmAle mAtRisaMsthAne panchamaM paTalaM from shrIreNukAtantram, Pitambarapeeth, Datia

Latest update : May 18, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# રેણુકાકવચં ભૈરવરુદ્રયામાલે

શ્રી દેવ્યુવાચ ।

જમદગ્નિપ્રિયાં દેવીં રેણુકામેકમાતરં
સર્વારમ્ભે પ્રસીદ ત્વં નમામિ કુલદેવતામ્ ।
અશક્તાનાં પ્રકારો વૈ કથ્યતાં મમ શઙ્કર
પુરશ્ચરણકાલેષુ કા વા કાર્યા ક્રિયાપરા ॥

શ્રી શઙ્કર ઉવાચ ।

વિના જપં વિના દાનં વિના હોમં મહેશ્વરિ ।
રેણુકા મન્ત્રસિદ્ધિસ્યાન્નિત્યં કવચપાઠતઃ ॥

ત્રૈલોક્યવિજયં નામ કવચં પરમાદ્ભુતમ્ ।
સર્વસિદ્ધિકરં લોકે સર્વરાજવશઙ્કરમ્ ॥

ડાકિની-ભૂતવેતાલ-બ્રહ્મરાક્ષસ-નાશનમ્ ।
પુરા દેવાસુરે યુધ્દે માહિષે લોકે વિગ્રહે ॥

બ્રહ્મણા નિર્મિતા રક્ષા સાધકાનાં સુખાય ચ ।
મન્ત્રવીર્યં સમોપેતં ભૂતાપસ્માર-નાશનમ્ ॥

દેવૈર્દેવસ્ય વિજયે સિદ્ધેઃ ખેચર-સિધ્દયે ।
દિવા રાત્રમધીતં સ્યાત્ રેણુકા કવચં પ્રિયે ॥

વને રાજગૃહે યુદ્ધે બ્રહ્મરાક્ષસસઙ્કુલે ।
બન્ધને ગમને ચૈવ કર્મણિ રાજસઙ્કટે ॥

કવચસ્મરણાદેવ સર્વં કલ્યાણમશ્નુતે ।
રેણુકાયાઃ મહાદેવ્યાઃ કવચં શ◌ૃણુ પાર્વતિ ॥

યસ્ય સ્મરણમાત્રેણ ધર્મકામાર્થભાજનમ્ ।
રેણુકા-કવચસ્યાસ્ય ઋષિર્બ્રહ્મા વિધીયતે ॥

છન્દશ્ચિત્રાહ્વયં પ્રોક્તં દેવતા રેણુકા સ્મૃતા ।
પૃથ્વી બીજં રમા શક્તિઃ પુરુષાર્થ-ચતુષ્ટયમ્ ॥

વિનિયોગો મહેશાનિ તદાકાલે પ્રકીર્ત્તિતઃ ( પ્રકીર્તિતઃ )।
ધ્યાત્વા દેવીં મહામાયાં જગન્માતરમમ્બિકામ્ ॥

પૂર્ણકુમ્ભસમાયુક્તાં મુક્તાહારવિરાજિતામ્ ।
સ્વર્ણાલઙ્કારસંયુક્તાં સ્વર્ણસિંહાસનસ્થિતામ્ ॥

મસ્તકે ગુરુપાદાબ્જં પ્રણમ્ય કવચં પઠેત્ ।
ઇન્દ્રો માં રક્ષતુ પ્રાચ્યાં વહ્નૌ વહ્નિઃ સુરેશ્વરિ ॥

યામ્યાં યમઃ સદા પાતુ નૈરૃત્યાં નિરૃતિસ્તથા ।
પશ્ચિમે વરુણઃ પાતુ વાયવ્યે વાયુદેવતા ॥

ધનશ્ચોત્તરે પાતુ ઈશાન્યામીશ્વરો વિભુઃ ।
ઊર્ધ્વં બ્રહ્મા સદા પાતુ અનન્તોઽધઃ સદાઽવતુ ॥

પઞ્ચાન્તકો મહેન્દ્રશ્ચ વામકર્ણેન્દુભૂષિતઃ ।
પ્રણવં પુટિતં કૃત્વા તત્કૃત્વા પ્રણવં પુનઃ ॥

સમુચ્ચાર્ય તતો દેવીકવચં પ્રપઠે તથા ।
બ્રહ્માણી મે શિરઃ પાતુ નેત્રે પાતુ મહેશ્વરી ॥

વૈષ્ણવી નાસિકાયુગ્મં કર્ણયોઃ કર્ણવાસિની ।
કણ્ઠં માતુ મહાલક્ષ્મીર્હૃદયં ચણ્ડભૈરવી ॥

બાહૂ મે બગલા પાતુ કરૌ મહિષમર્દિની ।
કરાઙ્ગુલિષુ કેશેષુ નાભિં મે ચર્ચિકાઽવતુ ॥

ગુહ્યં ગુહ્યેશ્વરી પાતુ ઊરૂ પાતુ મહામતિઃ ।
જાનુની જનની રામા ગુલ્ફયોર્નારસિંહિકા ॥

વસુન્ધરા સદા પાદૌ પાયાત્પાદાઙ્ગુલીષુ ચ ।
રોમકૂપે મેદમજ્જા રક્ત-માંસાસ્થિખણ્ડિકે ॥

રેણુકા જનની પાતુ મહાપુરનિવાસિની ।
રક્ષાહીનં તુ યત્સ્થાનં વર્જિતં કવચેન તુ ॥

પૂર્વં બીજં સમુચ્ચાર્ય સમ્પુટક્રમયોગતઃ ।
મુદ્રાં વધ્વા મહેશાનિ ગોલં ન્યાસં સમાચરેત્ ॥

અસ્ય શ્રીરેણુકા-કવચમન્ત્રસ્ય બ્રહ્મા ઋષિઃ અનુષ્ટુપ્ છન્દઃ રેણુકા દેવતા
લં બીજં રેણુકા પ્રીત્યર્થે ગોલન્યાસે વિનિયોગઃ ।

ૐ રાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ રીં તર્જનીભ્યાં નમઃ ।
ૐ રૂં મધ્યમાભ્યાં નમઃ ।
ૐ રૈં અનામિકાભ્યાં નમઃ ।
ૐ રૌં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।

એવં હૃદયાદિન્યાસઃ ।

ૐ પં નમઃ મૂર્ધ્નિ ।
ૐ ફં નમઃ દક્ષિણનેત્રે ।
ૐ બં નમઃ વામનેત્રે ।
ૐ ભં નમઃ દક્ષિણનાસાપુટે ।
ૐ મં નમઃ વામનાસાપુટે ।
ૐ યં નમઃ દક્ષિણકર્ણે ।
ૐ રં નમઃ વામકર્ણે ।
ૐ લં નમઃ મુખે ।
ૐ વં નમઃ ગુદે ।

બ્રહ્માણી બ્રહ્મભાગે ચ શિરો ધરણિ ધારિણી ।
રક્ષ રક્ષ મહેશાનિ સદા માં પાહિ પાર્વતી ॥

ભૈરવી ત્રિપુરા બાલા વજ્રા મે તારિણી પऱા ।
રક્ષ રક્ષ મહેશાનિ સદા માં પાહિ પાર્વતી ॥

એષા મેઽઙ્ગં સદા પાતુ પાર્વતી હરવલ્લભા ।
મહિષાસુરસંહર્ત્રી વિધાતૃવરદાયિની ॥

મસ્તકે પાતુ મે નિત્યં મહાકાલી પ્રસીદતુ ।
આકાશે તાડકા પાતુ પાતાલે વહ્નિવાસિની ॥

વામદક્ષિણયોશ્ચાપિ કાલિકા ચ કરાલિકા ।
ધનુર્બાણધરા ચૈવ ખડ્ગ-ખટ્વાઙ્ગ-ધારિણી ॥

સર્વાઙ્ગં મે સદા પાતુ રેણુકા વરદાયિની ।
રાં રાં રાં રેણુકે માતર્ભાર્ગવોદ્ધારકારિણી ॥

રાજરાજકુલોદ્ભૂતે સંગ્રામે શત્રુસङ્કટે ।
જલાપ્લાવ્યે વ્યાઘ્રભયે તથા રાજભયેઽપિ ચ ।
શ્મશાને સङ્કટે ઘોરે પાહિ માં પરમેશ્વરિ ॥

રૂપં દેહિ યશો દેહિ દ્વિષતાં નાશમેવ ચ ।
પ્રસાદઃ સ્યાચ્છુભો માતર્વરદા રેણુકે ભવ ॥

ઐં મહેશિ મહેશ્વરિ ચણ્ડિમે
      ભુજઙ્ગધારિણિ શઙ્ખકપાલિકે ।
કનક-કુણ્ડલ-મણ્ડલ-ભાજને
      વપુરિદઞ્ચ પુનીહિ મહેશ્વરિ ॥

ઇદં શ્રીકવચં દેવ્યાઃ રેણુકાયા મહેશ્વરિ ।
ત્રિકાલં યઃ પઠેન્નિત્યં તસ્ય સિદ્ધિઃ પ્રજાયતે ॥

ગ્રહણેઽર્કસ્ય ચન્દ્રસ્ય શુચિઃ પૂર્વમુપોષિતઃ ।
શતત્રયાવૃત્તિપાઠાન્મન્ત્રસિદ્ધિઃ પ્રજાયતે ॥

નદીસઙ્ગમમાસાદ્ય નાભિમાત્રોદકસ્થિતઃ ।
રવિમણ્ડલમુદ્વીક્ષ્ય જલે તત્ર સ્થિતાં શિવામ્ ॥

વિચિન્ત્ય મણ્ડલે દેવી કાર્યે સિદ્ધિર્ભવેદ્ધ્રુવમ્ ।
ઘટં તવ પ્રતિષ્ઠાપ્ય વિભૂતિસ્તત્ર વેશયેત્ ।
દીપં સર્ષપતૈલેન કવચં ત્રિઃ પઠેત્તદા ॥

ભૂતપ્રેત-પિશાચાશ્ચ ડાકિન્યો યાતુધાનિકા ।
સર્વ તે નાશમાયાન્તિ કવચસ્મરણાત્પ્રિયે ॥

ધનં ધાન્યં યશો મેધાં યત્કિઞ્ચિન્મનસેપ્સિતમ્ ।
કવચસ્મરણાદેવ સર્વમાપ્નોતિ નિત્યશઃ ॥

ઇતિ શ્રી માતૃસંસ્થાને ભૈરવરુદ્રયામલે રેણુકાકલ્પે
પઞ્ચમં પટલં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Kaushal S. Kaloo kaushalskaloo at gmail.com

*Renuka Kavacham 1 from bhairavarudrayAmAlatantra*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*